International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 305-308
© 2026 IJMH
www.themultijournal.com
Received: 26-03-2026
Accepted: 22-04-2026
Publish : 23-04-2026

**डा. राजकिशोरदाश:**
संस्कृतशिक्षक:
घु. उदयागिरि, कन्धमाल

**Correspondence:**
**डा. राजकिशोरदाश:**
संस्कृतशिक्षक:
घु. उदयागिरि, कन्धमाल

# ऋतुसंहारे कामसूत्रस्य प्रभावः

**डा. राजकिशोरदाशः**

**DOI:** https://doi.org/10.5281/zenodo.20521624

**सारांशः-**

धर्मार्थकाममोक्षाख्यं पुरुषार्थचतुष्टयं भारतीयसंस्कृतेराधारस्तम्भो भवति। मनुष्याणां निखिलकामनानां पर्यवसानमत्रैव परिलक्ष्यते। शरीरं, मनः, बुद्धिः, आत्मा चैतन्यचतुष्टयं मनुष्यान्तर्गतमनन्तकामनानामावश्यकतानां च निधानं भवति। एषां चतुर्णामंगानां सर्वविधावश्यकतानां च संपूर्तिः धर्मार्थकाममोक्षद्वारैव भवितुमर्हति। बुद्धये धर्मस्य, शरीरपुष्टयेऽर्थस्य, मनस्तुष्टये कामस्य, तथाऽऽत्मने मोक्षस्यावश्यकताऽपरिहर्त्तव्या भवति। यतो हि भोजनादिनां विना शरीरस्य निष्क्रियतां च गच्छति। कामं (स्त्रियं) विना मनः कुण्ठितं भवति। धर्मं विना सत्यरहिता बुद्धिः भ्रष्टा भवति तथा मोक्षरहितस्यात्मनः पतनं न केनाप्युपायेन रोद्धुं शक्यते। यथा धर्मेण बुद्धेः सम्बन्धो नैसर्गिकः, तथा शरीरेणार्थस्य, मनसा कामस्य, आत्मना मोक्षस्य च सम्बन्धोऽपि नित्यः। इत्थं धर्मार्थकाममोक्षेषु पुरुषार्थेष्वेकोऽन्यस्यावश्यकतानुसारमाधार आधेयश्च सम्पद्यते। ततः धर्मविरुद्धस्यार्थस्य कामस्य च यथाशास्त्रानिर्देशं सेवनेन मोक्षसौख्याधिगमो मानवजीवनस्य चरमलक्ष्यत्वेन निर्धारितः कल्याणकामिभिः। तस्माद् धर्मार्थमोक्षाणामालोचने प्रवर्त्तमानानां शास्त्रनिवहाणां यावदौचित्यं तावदेव कामविषयमधिकृत्य विरचितानां शास्त्राणामपीति स्थितिः।

**विशेषशब्दाः-शर्बरी,किसलय,हृष्टाः,खण्डाभ्रकम्,कुञ्चिताक्षी,**

**प्रस्तावना-**

भारतीयपरम्परायामृगवेदो विश्ववाङ्मयस्य सर्वप्राचीनतमः ग्रन्थो भवति। सर्वेषां ज्ञानानामाकरत्वेन "वेदः सर्वज्ञानमयः" इत्युच्यते। अनया दृष्ट्या कामकलाविषयकज्ञानस्य मूलाधारो वेद इति सिद्धान्तितः। अन्यथा सर्वज्ञानमयत्वं तस्य नोपपद्यते। तत्र काम आदिदेव इत्युपदिशन्नृगवेदीयो मन्त्रः कामकलासम्बन्धिनमाभासं ददाति। तैत्तिरीयोपनिषदि आनन्दादेव समग्रस्य स्थावरजंगमात्मकस्य जगतः उत्पत्तिः प्रतिपाद्यते। तस्य ह्यानन्दस्य उपस्थ एकायनं भवतीति बृहदारण्यकोपनिषद् साटोपं प्रतिपादयति। अथर्ववेदे सृष्टिवर्णनप्रसंगे कामः सर्वप्रथममजायतेत्युच्यते।

इत्थं भारतीयशास्त्रपरम्परायां कामविषयिणी चर्चाऽतिपुरातनी भवति। परन्तु सत्स्वपि नैकेषु कामविषयकाभासप्रदानपरेषु शास्त्रेष्वद्यत्वे वात्स्यायनप्रणीतं कामसूत्रं सर्वांगपरिपूर्णं प्रथिततमं शास्त्रम्। अस्मिन् कामसूत्रे वात्स्यायनः कामसूत्रस्योद्भवं विकासं च समाश्रित्य किञ्चिदालोचनं प्रस्तौति। तथाहि निखिलाः प्रजाः सृष्ट्वा तासां स्थितिंनिबन्धनं त्रिवर्गस्य साधनमध्यायानां शतसहस्रेण प्रजापतिनोक्तम्। अस्मिँल्लक्षअध्यायात्मके ग्रन्थे धर्मार्थकामविषयकाः नियमाः उट्टंकिताः। तस्मात् कामविषयकं नियममाश्रित्य शिवानुचरो नन्दी सहस्रेणाध्यायानां पृथक् कामसूत्रं प्रोवाच। तत्र दत्तकादिभिः प्रणीतानां शास्त्रावयवानामेकदेशत्वाद् महदिति च बाभ्रव्यस्य दुर्ध्येयत्वात् संक्षिप्य वात्स्यायनेन सर्वमर्थमल्पेन ग्रन्थेन कामसूत्रमिदं प्रणीतम्।तस्य कामसूरत्रस्य प्रभावः कालिदासकाव्येषु दरीदृश्यते।अत्र ऋतुसंहारकाव्ये कथं प्रभाव अस्ति तज्ज्ञायते।

**चतु:षष्टिकलाविभावाः**

महर्षिवात्स्यायनः कामसूत्रस्य प्रथमाधिकरणस्य तृतीयाध्याये चतु:षष्टिकलाविषये आलोचनां कृतवान्। ताः एव कलाः कन्यानां कृतेऽवश्यं शिक्षणीयाः। यतो हि यौवने उत्तरवयसि वा तासां फलानि परिदृष्टानि भवन्ति। तासु कलासु "दशनवसनाङ्गरागः" एव अष्टमकलात्वेन उपदिष्टः।

"दशनवसनाङ्गरागः" इत्यत्र विद्यमानः रागशब्दः प्रत्येकं योज्यते। एवं च दशनानां वसनानामङ्गानां च रञ्जनविधिरवश्यं कन्याभिः विधातव्यः।[1]

**गीतम्, वाद्यम् . . . . . . . दशनवसनांगरागः कामसूत्रस्यावयविन्यः।।**[1]

महाकविः कालिदासः ऋतुसंहारनाम्नि खण्डकाव्ये ग्रीष्मर्तुवर्णनप्रसंगे कामसूत्रस्येमं प्रभावं स्मरन् परिलक्ष्यते। ग्रीष्मर्तौ समागते नितम्बिनीनां रमणीयगमनं खलु जनस्य चित्ते मन्मथभावमुत्पादयति।

तासां नितम्बिनीनां चरणसौन्दर्यवर्णनप्रवृत्तः महाकविः "नितान्तलाक्षारसरागरञ्जितैः चरणैः" इति पदं प्रयुक्तवान्।

**नितान्तलाक्षारसरागरञ्जितैर्नितम्बिनीनां चरणैः सनूपुरैः।**
**पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथम् ।।**[2]

एतेन तासां चरणयुगलं लाक्षारसरागरञ्जितं भवति इत्यवगम्यते। नितम्बिनीभिः स्वकीयचरणयुगलं लाक्षारसरागाञ्जितं कृतम् इति वर्णयन् महाकविः कामसूत्रोक्तं प्रभावं स्पष्टं प्रतिपादयति।

**नायिकामद्यपानविभावः**

मद्यपाने जन्तूनां प्रवृत्तिः स्वाभाविकी दृश्यते। यद्यप्येतदर्थं न किञ्चिद् विधिवाक्यं कुत्रापि दृश्यते तथापि तत्र प्रवर्त्तन्ते प्राणिनः। धर्मशास्त्रकारैः विगर्हितमिदं मद्यपानं यज्ञादिकर्मसु नितरां प्रशस्यते। महामुनिः वात्स्यायनः कामरूपतृतीयपुरुषार्थसम्पादने मद्यपानस्योपयोगितां सुदृढं प्रतिपादयति। किं च स्त्रीणामनुरञ्जनविधौत्कठकामवासनां चरितार्थां विधातुं मद्यपानमेकमपरिहार्यमङ्गं भवति। कामसूत्रस्य द्वितीयाधिकरणस्य चतुर्थाध्याये चुम्बनेनोपक्रम्य मद्यमदेन मत्तायां नायिकायां नायकेन नखदन्तप्रयोगः कर्त्तव्यः इत्युच्यते[7] ।

**तस्य प्रथमसमागमे प्रवासप्रत्यागमने प्रवासगमने क्रुद्धप्रसन्नायां मत्तायां च प्रयोगः। न नित्यमचण्डवेगयोः।।**[3]

तथैव तस्यैवाधिकरणस्य दशमाध्याये युक्त्यापीतां नायिकां मधुरया वाचा कृतानुरञ्जनः नायकः पुनः मद्यपानाय प्रेरयेत्।

**नागरिकः सहमित्रजनेन परिचारकैश्च कृतपुष्पोपहारे संचारितसुरभिधूपे रत्यावासे प्रसाधिते वासगृहे कृतस्नानप्रसाधनां युक्त्यापीतां स्त्रियं सान्त्वनैः पुनः पानेन चोपक्रमेत ।।**[4]

तदग्रे नायिकामावर्ज्य नायकः पुनः पानेन तस्याः प्रोत्साहनं कुर्यात्। उपर्युक्तानां सूत्राणां पर्यालोचनेनायं निष्कर्षः लभ्यते यत् कामक्रीडायां नायिकया कृतं मद्यपानं कार्यसाधकं वात्स्यायनसम्मतं च।महाकविः कालिदासः ऋतुसंहारनाम्नि खण्डकाव्ये ऋतुवर्णनावसरे केषुचित् स्थलेषु कामसूत्रीयं प्रभावमुपस्थापयति। वर्षार्तुवर्णनायां स्त्रियः ससीधुभिः वदनैः कामिनां रतिं संजनयन्तीति वर्णयता तेन स्त्रीणां मद्यपानविषयः स्पष्टं समुल्लिखितः।

**सुगन्धिनिश्वासविकम्पितोत्पलं मनोहरं कामरतिप्रबोधकम् ।**
**निशासु हृष्टाः सहकामिभिः स्त्रियः पिबन्ति मद्यं मदनीयमुत्तमम् ।।**[5]

अपि च शिशिरर्तुवर्णनानिपुणेन महाकविना तस्मिन्नेव काले "मुखासवामोदितवक्त्रपङ्कजाः स्त्रियः उत्सुकाः सत्यः शय्यागृहं विशन्ती"त्येवं वदता स एव प्रभाव उत्पादितः। अपि च तत्रैव सर्गे दशमश्लोके "स्त्रियः पिबन्ति मद्यमि"ति वचनात् स्पष्टं स्त्रीमद्यपानं वर्णितम्।

**नखक्षतविभावः**

नायकनायिकयोः मनोगतः सहजातः रतिभावः उद्दीपनविधौ कांश्चित् बाह्योपचारानपेक्षते। तेष्वपेक्षमाणेषु बाह्योपचारेष्वालिङ्गनचुम्बनाभ्यामनन्तरं नखक्षतकरणं महत्त्वपूर्णं स्थानमङ्गीकरोति। आलिङ्गनचुम्बनाभ्यां हि समुद्दीपिते रतिभावे नायकनायिकाः परस्परंगेषु नखच्छेदं जनयन्ति।

नायकविहितेन नखक्षतेन रोमाञ्चितशरीरा हि नायिका सुतरां कामक्रीडातुरा परिलक्षिता भवति। कामशास्त्रे इयं नखक्षतक्रियैका विशिष्टा कला भवति। नायिकायाः केषु केष्वङ्गेषु नखक्षतं कर्त्तव्यं तद्विषये स्थानान्यपि निर्दिष्टानि। कक्षौ स्तनौ गलः पृष्ठं जघनमूरु च नखक्षतस्थानानि भवन्ति।

**कक्षौ स्तनौ गलः पृष्ठं जघनमूरू च स्थानानि**[6] **।**

अपि च नायकेन नायिकायाः अंगे नखैः लेखा विधातव्या। सा च लेखा येषु केष्वपि अंगेषु द्व्यं गुल्क्यंगुला वा प्रत्यग्रशिखा निष्पाद्या। अस्य नखक्षतस्य महती प्रशंसा वात्स्यायनेन कृता दृश्यते। तथा हि गूढस्थानेषु नायकविहितानि नखक्षतानि पश्यन्त्याः नायिकायाः चिरपरित्यक्ता प्रीतिरप्यभिनवा भवति।

**नखक्षतानि पश्यन्त्या गूढस्थानेषु योषितः।**
**चिरोत्सृष्टाप्यभिनवा प्रीतिर्भवति पेशला** [7]**।।**

किं च कामवासनायाः उद्दीपनविधौ नखक्षतं दन्तक्षतं च विहायान्यत् किञ्चिदुत्कृष्टं साधनं नैव विद्यत इति स्पष्टतया समुद्घोषितवान् महर्षिः वात्स्यायनः।

महाकविः कालिदासः स्वकीये ऋतुसंहारनाम्नि खण्डकाव्ये कामसूत्रस्याधमर्ण्यं स्वीकरोति। तथाहि चतुर्थसर्गे नवयौवनानां स्तनानां पाणियग्रकृताभिलेखां वर्णयन् स्तनांगेषु नखक्षतं विधातव्यमिति स्पष्टं निर्दिशति।

**दन्तच्छदैः सव्रणदन्तचिह्नैः स्तनैश्च पाण्यग्रकृताभिले खैः।**

**संसूच्यते निर्दयमंगनानां रतोपयोगो नवयौवनानाम्**[8] ॥

पञ्चमसर्गे नखपदचितभागान् स्तनाग्रान् वीक्ष्यमाणानां तरुणीनां विषये कथयता महाकविना स एव पूर्वोक्तविषयः प्रतिपादितः।

**नखपदचितभागान् वीक्षमाणाः स्तनाग्रानधर-**

**किसलयाग्रं दन्तभिन्नं स्पृशन्त्यः।**

**अभिमतरसमेतं नन्दयन्त्यस्तरुण्यः सवितु-**

**रुदयकाले भूषयन्त्याननानि**[9] ॥

पुनरपि नायिकांगेषु नखैः लेखा विधातव्येतीमं भावं महाकविः "पाण्यग्रकृताभिलैखैः स्तनैः" इति वचनेन स्पष्टं प्रतिपादितवान्।

**अन्याप्रियेण परिभुक्तमवेक्ष्य**

**गात्रं हर्षान्विता विरचिताधरचारुशोभा।**

**कूर्पासनं परिदधाति नखक्षतांगी व्यालम्बिनी-**

**कललितालककुञ्चिताक्षी** [10]॥

पुनरपि चतुर्थसर्गे प्रियेण परिभुक्तं शरीरमवेक्ष्य हर्षान्वितायाः कस्याश्चिन्नायिकायाः वर्णनं विधाय महाकविः कामसूत्रस्य पूर्वोक्तं भावमुररीकरोति। किं च पञ्चमसर्गे नखक्षतान् स्तनाग्रान् वीक्ष्यमाणाः तरुण्यः आनन्दिताः भवन्तीति महाकवेः वचनात् नूनं तासामानन्दोऽप्रकाश्यांगेषु नखक्षतज इति निश्चेतुं शक्यते।

**<u>दन्तक्षतविभावः</u>**

**उत्तरौष्ठमन्तर्मुखं नयनमिति मुक्त्वा चुम्बनवद्दशनरदनस्थानानि**[11]।

सुरतकर्मण्यपेक्षितेषु बाह्योपचारेषु नखक्षतरूपेणोपचारेण नायकनायिकयोः कामलालसायां वर्द्धमानायां सत्यां दन्तक्षतं विधातुमुभयोः प्रबलोत्कण्ठा संजायते। नखक्षतस्येव दन्तक्षतस्यापि स्थानं वात्स्यायनेन निर्दिष्टम्। उत्तरोष्ठं, जिह्वां, नयनं च परित्यज्य चुम्बनविधौ निर्दिष्टेषु स्थानेषु दन्तक्षतं करणीयम्।

**गूढकमुच्छूनकं विन्दुविन्दुमाला प्रबालमणिमणिमाला खण्डाभ्रकं वराहचर्वितकमिति दशनच्छेदविकल्पाः**[12]।

दन्तक्षतकरणात् पूर्वं दन्तानां गुणदोषौ अवश्यं ज्ञातव्यामिति धिया दन्तगुणानुक्त्वा वात्स्यायनः दशनच्छेदनविकल्पान् निर्दिष्टवान्। गूढकमुच्छूनकं, विन्दुः, विन्दुमाला, प्रबालमणिः, मणिमाला, खण्डाभ्रकं, वराहचर्वितकमिति अष्टधा दन्तक्षतभेदाः।

उपर्युक्तेषु अष्टसु परिकल्पितेषु दन्तक्षतेषु गूढकोच्छूनकविन्दुसंज्ञकानि दन्तक्षतान्यधरस्थानानि भवन्ति। इतराणि त्वंगान्तरस्थानानि भवन्ति।

**. रतिश्रमक्षामविपाण्डुवक्त्राः सम्प्राप्तहर्षाभ्युदयास्तरुण्यः।**

**हसन्ति नोच्चैर्दशनाग्रभिन्नान् प्रपीड्यमानानधरानवेक्ष्य**[13] ॥

कविकुलतिलकः कालिदासः स्वकीये ऋतुसंहारे केषुचित् श्लोकेषु दन्तक्षतप्रसंगं कामसूत्रप्रभावितः सन् समुत्थापितवान्। हेमन्ततर्तौ तरुण्यः सुरतकाले नायकदशनाग्रभिन्नान् पीड्यमानान् स्वकीयानधरानवेक्ष्य उच्चैर्न हसन्ति[25] । तत्रैव सर्गे सव्रणदन्तचिह्नैः दन्तच्छदैः नवयौवनानामंगनानां रतोपयोगः संसूच्यत इति च नाधरेषु दन्तक्षतविषयः स्पष्टं प्रतिपादितः।

**काचिद्विभूषयति दर्पणसक्तहस्ता बालातपेषु वनिता वदनारविन्दम्।**

**दन्तच्छदं प्रियतमेन निपीतसारं दन्ताग्रभिन्नमवकृष्य निरीक्षते च** [14]।।

**<u>प्रणयकलहविभावः</u>**

**.तत्र सुभृशः कलहो रुदितमायासः शिरोरुहानामवक्षोदनं प्रहणमासनाच्छयनाद्वा मत्यां पतनं माल्यभूषणावमोक्षो भूमौ शय्या च**[15]।

परस्परविश्वासः परस्परानुरागश्चोभयोः नायकयोः प्रणयहेतुः भवति। यदा नायिकायाः अखण्डविश्वासोऽत्यन्तानुरागश्च कस्मिंश्चिन्नायके उत्पद्यते तदा सा स्वकीयं प्रेम तस्मै निवेदयति। अस्मिन् स्थले नायिका सदा नायकं निजानुरक्तं द्रष्टुमभिलषति। परन्तु दैवाच्चेन्नायकः नायिकान्तराभिधानग्रहणपरः परिलक्ष्यते तदा जातोरोषया नायिकया विहितः कलहः "प्रणयकलहः" इत्यभिधीयते। कलहेऽस्मिन् समुत्पन्नकोपा नायिका स्वकीयेन परुषतरवचनेन रुदितादिना कार्येण च स्वकीयमनोगतं प्रकटयति।

महाकवीना उपयुक्तस्य सूत्रस्य भावमादाय सीततर्तौ खण्डितानायिकायाः कार्यं वर्णितम्।

**कृतापराधान् बहुशोपि तर्जितान् सवेपथून् साध्वसलुक्तचेतसेः**[16].....

सुरताभिलाषिणः भर्त्तृनिरीक्षसमदाः स्त्रीयः तत् अपराधान् विस्मृतवत्यः इति वाक्ये कामसूत्रस्य प्रभावः दृश्यते।

**प्रोषितभर्तृकायाः कर्त्तव्यविभावः**

नायिका येनैवोपायनिचयेन नायकं स्वाभिमुखीकृत्य स्वकार्यं सम्पादयति तेष्वलंकारपरिधानमन्यतमं भवति। किं च रमणीयवेषेण मनःसन्तोषजनकेन च कार्येण सा नायकस्य प्रियभाजनं भवति, परन्तु यदा नायकः प्रवासे तिष्ठति तदा तदनुपस्थितिमनुभूय नायिकाया किमाचरितव्यमिति विषये स्वमतमुपस्थापयन् वात्स्यायनो निगदति यत्-

**प्रवासे मंगलमात्राभरणा देवतोपवासपरा वार्यायां स्थिता गृहानवेक्षेत**[17]।

प्रोषितभर्तृका नायिका सर्वालंकारान् विमुच्य मंगलमात्राभरणा भवेत्। शरीरस्य संस्कृतिरपि तया न करणीयेति ।

**. प्रोषिते मृजानियमश्चालंकारस्य प्रतिषेधः । मंगलं त्वपेक्ष्यम् । एकं शंखवलयं वा धारयेत्**[18] **।**

प्रोषितभर्तृकायाः विषये वात्स्यायनेनोक्तं मतमेतत् सादरं स्वीकृत्य महाकविः कालिदासः वर्षावर्णनायां तथैव वर्णितवान् । वर्षाकाले समागते यदा सर्वाः नायिकाः स्वस्वनायकसमेताः आनन्दमनुभवन्ति तदा प्रवासिनां प्रमदाः विमुक्तमाल्याभरणानुलेपनाः निराशाः सत्यः स्थिताः इति ।

**विलोचनेन्दीवरवारिविन्दुभिर्निषिक्तविम्बाधरचारुपल्लवाः ।**
**निरस्तमाल्याभरणानुलेपनाः स्थिता निराशाः प्रमदाः प्रवासिनाम्**[19] **।।**

अत्र प्रोषितभर्तृकानां माल्याभरणानुलेपंत्यागं वर्णयति महाकवौ कामसूत्रप्रभावः स्पष्टं निपतितः भवति ।

**कामदशाविभावः**

कामो हि उन्मादात् प्रभृति विषयाप्राप्तावनुकूलप्रत्ययवशात् प्रतिक्षणमुपवर्द्धमान आप्राणत्यागं वर्त्तते। तस्यासाधारणकार्योत्पत्त्या व्यवहारार्थं दश स्थानानि पूर्वाचार्यैरुक्तानि वात्स्यायनसम्मतानि भवन्ति। तेषून्मादोऽष्टमी कामदशा भवति । यदा कामी कामदशापन्नो विगतव्रीडो भवति तदा निर्भयस्य तस्योन्मादः प्रवर्त्तते।

**चक्षुः प्रीतिर्मनःसंगः संकल्पोत्पत्तिर्निद्राच्छेदस्तनुताविषयेभ्यो ।**
**व्यावृत्तिर्लज्जाप्रणाश उन्मादो मूर्च्छा मरणमिति तेषां लिंगानि**[20] **।।**

उन्मादग्रस्तो हि कामी वाचालवत् व्यवहारति लोके ।

महाकविः कालिदासः पूर्वोक्तं भावमादाय उन्मादग्रस्तस्य कस्यचित् कामिनः शरद्वर्णनावसरे वर्णनं कृतवान् । तत्र हि पथिकजनः स्वप्रियाविरहखिन्नः उत्पलेषु तस्याः असितनयनशोभां मत्तहंसस्वनेषु क्वणितकनककाञ्चीं, बन्धुजीवेधररुचिरशोभां संलक्ष्य भ्रान्तचित्तः सन् रोदनपरायणो भवतीति वर्णितं वर्त्तते47 ।

**असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु**
**क्वणितकनककाञ्चीं मत्तहंसस्वनेषु ।**
**अधररुचिरशोभां बन्धुजीवे प्रियाणां**
**पथिकजन इदानीं रोदिति भ्रान्तचित्तः**[21] **।।**

यस्मादेव वर्णनात् कस्यचित् कामिनः उन्मादशापन्नस्याचरणं सम्यगवगम्यते ।

**उपसंहारः**-कविकुलतिलकस्य कालिदासस्य ऋतुसंहारकाव्ये काम-सूत्रीयप्रभावाः दरीदृश्यन्ते। कामसूत्रानुमोदितकालिदासीयऋतुसंहा-रकाव्यस्य मानवजीवनस्योपरि प्रभावः निपततीति नास्ति सन्देहस्य अवकाशः । कामसूत्रं समाजस्य कृते महत्यावश्यकता विद्यते । कालिदासस्य ऋतुसंहारकाव्यस्य पठनेन पाठकाः सहृदयाः ह्लाददायकाः भवन्ति । अतः कामसूत्रस्य प्रभावः कथमस्तीति मया आलोचित इति दिक्।

**सहायकग्रन्थसूची-**


रतिमञ्जरी-महाकविजयदेवः, चौखम्बा संस्कृत सीरीज आफिस,वाराणसी ।
रतिरहस्यम् – शर्मा श्रीरामानन्दः, कृष्णदास एकादेमी वाराणसी ।
कामसूत्रम्- शास्त्रीपण्डितदेवदत्तः, चौखम्बासंस्कृतसंस्थान, दिल्ली ।
ऋतुसंहारः- शर्मा केदारनाथः, चौखम्बा विद्याभवन वाराणसी ।
तैत्तरीय उपनिषद्- गीताप्रेस्, गोरखपुर ।


**पाद टिप्पणी -**

1. का. सू. , १ / ३ / १५.
2. ऋ. सं. , १/५.
3. का. सू. , २ / ४ / २.
4. का. सू. , २ / १० / १.
5. ऋ. सं. , ५ / १०.
6. का. सू. , २ / ४ / ५.
7. का. सू. , २/४/२७.
8. ऋ. सं. , ४ /१२.
9. ऋ. सं. , ५ / १५.
10. ऋ. सं. , ४ / १६.
11. का. सू. , २/५/१
12. का. सू. , २ / ५ / ४.
13. ऋ. सं. , ४/६
14. ऋ. सं. , ४ / १३.
15. का. सू. , २ / १० / २८.
16. ऋतु.सं.5/6
17. का. सू. , 4 / 1 / 42
18. का. सू. , 6 / 2 / 63
19. ऋ. सं. , 2 / 12
20. का. सू. , 5 / 1 / 5
21. ऋ.सं. , 3/24.